# Naradaproktam Kashimahatmyam

# નારદપ્રોક્તં કાશીમાહાત્મ્યમ્

## Document Information

Text title : Naradaproktam Kashimahatmyam

File name : kAshImAhAtmyamnAradaproktaM.itx

Category : shiva, shivarahasya, tIrthakShetra

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 13 | 447-463.1||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2024

*sanskritdocuments.org*

# નારદપ્રોક્તં કાશીમાહાત્મ્યમ્

કાશીપરતરં ક્ષેત્રં ક્ષેત્રાણામધિદૈવતમ્ ।
ભુક્તિમુક્તિપ્રદં પુણ્યં પાવનાનાં ચ પાવનમ્ ॥ ૪૪૭॥

તપોદાનાદિધર્માણામનન્તાનાં પરં ફલમ્ ।
યત્પ્રાસ્યાઽઽહુશ્ચ સા કાશી કાશ્યતે સર્વદા યતઃ ॥ ૪૪૮॥

પરાત્પરતરં યત્તુ તત્પરાત્પરતઃ શિવઃ ।
સ એવ કાશી કાશીતિ કથ્યતે કિં તતોઽધિકમ્ ॥ ૪૪૯॥

કાશી સ્મૃતાપિ સંસારમૂલનિર્મૂલનક્ષમા ।
સા સાક્ષાત્સેવિતા શૈવૈર્મોક્ષદા ભવતિ ધ્રુવમ્ ॥ ૪૫૦॥

હન્ત્યઘં સ્મૃતિમાત્રેણ દૃષ્ટ્વા પુણ્યં તનોતિ યા ।
સા નિર્વાણૈકનિલયા કાશી વિશ્વેશ્વરાલયા ॥ ૪૫૧॥

યસ્યાં શિવોઽપિ સતતં શ્રીમદ્વિશ્વેશ્વરાભિધે ।
લિઙ્ગે જાગર્તિ સા કાશી કલિકલ્મષનાશિની ॥ ૪૫૨॥

ચતુર્દશાપિ ભુવનાન્યેકતસ્તુલિતાન્યપિ ।
કાશીકોટ્યમ્શકોટ્યમ્શતુલ્યાનિ ન કદાચન ॥ ૪૫૩॥

કે વા વર્ણયિતું શક્તા કાશીં મુક્તિપ્રદાયિનીમ્ ।
કાશીપ્રભાવો વેદૈશ્ચાપ્યભિષ્ટોતું ન શક્યતે ॥ ૪૫૪॥

તિરસ્ક્રિયન્તે બ્રહ્માદ્યાઃ કાશીસ્થૈર્મશકૈરપિ ।
અત એતાદૃશીં કાશીં કો નુ વર્ણયિતું ક્ષમઃ ॥ ૪૫૫॥

ચ્યવન્તે બ્રહ્મસદનાદ્વૈકુણ્ઠાદપિ વસ્તુતઃ ।
મહાપ્રલયકાલેઽપિ ન કાશીવાસિનાં ચ્યુતિઃ ॥ ૪૫૬॥

એકાર્ણવેઽપિ સઞ્જાતે ત્રિશૂલાગ્રેણ કાશિકા ।
ઊર્ધ્વં ન યાતિ વિશ્વેશઃ સા કાશી કેનમીયતે ॥ ૪૫૭॥

તૃણાય મન્યતે હીન્દ્રં કાશીસ્થઃ પુલ્કસોઽપ્યતઃ ।
કાશીપુરીસમં વસ્તુ કુત્ર કેનોપમીયતે ॥ ૪૫૮॥

યસ્યાં ભવાની સતતં ભવભીમભયાપહા ।
દદાતિ પરમામૃદ્ધિં સા કાશી ભુક્તિમુક્તિદા ॥ ૪૫૯॥

યસ્યાં તનુવ્યયે જન્તોર્મુક્તિર્હસ્તગતા ધ્રુવમ્ ।
સદ્યો ભવતિ શુદ્ધસ્ય સા કાશી સેવ્યતે બુધૈઃ ॥ ૪૬૦॥

કાશીનારપ્રદાનેન પિતરઃ પૂર્વમાદરાત્ ।
નારદસ્ત્વં નારદોઽસીત્યુક્ત્વા મુક્તાસ્તતઃ પરમ્ ॥ ૪૬૧॥

કિં વક્તવ્યં મયા તત્ત્વં કાશ્યા યા કલ્મષાપહા ।
એતાવદેવ યત્કાશીતત્ત્વં જ્ઞાતં મયાધુના ॥ ૪૬૨॥

ઇદં શિવપ્રસાદસ્ય લેશેનેત્યવગમ્યતામ્ । ૪૬૩।૧।

॥ ઇતિ શિવરહસ્યાન્તર્ગતે નારદપ્રોક્તં કાશીમાહાત્મ્યં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૩ । ૪૪૭-૪૬૩।૧॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 13 . 447-463.1 ..

Notes:
Devarṣi Nārada દેવર્ષિ નારદ details to Himvāna હિમવાન about the glories of Kāśī કાશી - viz. KāśīMāhātmyam કાશીમાહાત્મ્યમ્; and that one can attain Kāśī કાશી only by Grace of Śiva શિવ i.e. Śivānugraha શિવાનુગ્રહ.

Encoded and proofread by Ruma Dewan

*Naradaproktam Kashimahatmyam*
pdf was typeset on April 28, 2024

Please send corrections to *sanskrit@cheerful.com*